Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 3 | ISSN : 2582-0095

# अभिज्ञानशाकुन्तले प्रयुक्तानां तिङन्तपदानामनुशीलनम्

डॉ. कैलाशचन्द्रसैनी
सहायकाचार्य:, शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालय:, जयपुरपरिसर:, जयपुरम्

**Artic Info**
Volume 5, Issue 3
Page Number : 110-116
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 10 May 2022

**शोधसारांश** :- काव्येषु नाटकं रम्ये तत्र रम्या शकुन्तला। तत्रापि चतुर्थोऽङ्क: तत्र श्लोकचतुष्ट्यम्।। उपर्युक्तश्लोक: अभिज्ञानशाकुन्तलनाटकस्य तत्रापि चतुर्थाङ्कस्य महत्वं द्योतयति। अस्मिन् शोधोलेखे अस्मिन् अङ्के समागतानां तिङ्गन्तपदानां विवेचनं कृतं विद्यते। अत्र कालिदासेन विभिन्नानां तिङ्गन्तदानां विभिन्नेषु अर्थेषु प्रयोग: कृतो विद्यते। धातुलकार-अर्थनिर्देशपुरस्सरं सर्वेषां तिङ्न्तपदानाम् अत्र विश्लेषणंविहितमस्ति।

**कूटशब्दा:** :- तिङन्तपदानि, भ्वादिगण:, सार्वधातुकसंज्ञा, आर्धधातुकसंज्ञा।

अस्मिन्नशोधपत्रे अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्के प्रयुक्तानां तिङन्तपदानामनुशीलनं करिष्यते। “अनसूया अद्य स राजर्षिरिष्टिं परिसमाप्य विसर्जित आत्मनो नगरं प्रविश्यान्त: पुरसमागत इतोगतं वृतान्तं स्मरति वा न वेति। प्रियम्वदा- विस्त्रब्धा भव। न तादृशा आकृतिर्विशेषा गुणविरोधिनो भवन्ति। तात इदानीमिमं वृतान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति।

**अनसूया** – यथाऽहं पश्यामि तथा तस्यानुमतं भवेत्।

**प्रियंवदा** – कथमिव

**अनसूया** – गुणवते कन्यका प्रतिपादनीयेत्ययं तावत् प्रथम: संकल्प:। तं यदि दैवमेव संपादयति नन्वप्रयासेन कृतार्थो गुरुजन:।

**प्रियंवदा** – सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि।

**अनसूया** – ननु सख्या: शकुन्तलाया सौभाग्यदेवताऽवर्चनीया।

**प्रियंवदा** – युज्यते।[1]

उपर्युक्तनाट्यांशे प्रथमं तिङ्न्तपदमस्ति-स्मरति। अत्र भ्वादिगणस्य स्मृ-चिन्तायाम् इत्यस्यामाद्धातो: लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप्-प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां कर्तरी शप्[2] इति शपि अनुबन्धलोपे सार्वधातुकार्धधताकयो: इति ऋकारस्य गुणे उरण् रपर:[3] इति रपरत्वे च स्मरति इति रूपं निष्पद्यते।

---

[1] अभि: शा. अंक – 4 पृ. 197

[2] पा.सू. 3/1/68

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पुन: उपर्युक्ते द्वितीयं तिङन्तपदमस्ति–प्रतिपत्स्यते। अत्र प्रति उपसर्गपूर्वकात् दिवादिगणस्य पद्–गतौ इत्यसमाद्धातो: लृट्लकारस्य प्रथमपुरुषैकचनविवक्षायां त प्रत्यये ससार्वधातुकसंज्ञवयां स्यतासी लृलुटो: इति स्य आगमे खरि च[4] इति दकारस्य चर्त्वे तकारे कृते टि्त् आत्मने पदानां टेरे इति टेरेत्वे प्रतिपत्स्यते इति रूपं निष्पते।

पुन: अन्यत् तिङन्तपदमस्ति–सम्पादयति। अत्र सम् उपसर्गपूर्वकात् दिवादिगणस्य पद्–गतौ इत्यस्माद्धातो: हेतुमति च इति णिचि अनुबन्धलोपे अत उपधाया: इति उपधावृद्धौ यदि इत्यस्य पुन: धातुसंज्ञायां लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽनुबन्धलोप सार्वधातुकसंज्ञायां शपि, सार्वधातुकेति गुणे कृते अयादेशे मस्य अनुस्वारे परसवर्णे च सम्पादयति इति रूपं निष्पद्यते।

अस्मिन्नेव नाट्यभागे अन्तिं तिङन्तपदमस्ति–युज्यते। अत्र दिवादिगणस्य युज् समाधौ इत्यस्माद्धातो: लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां त प्रत्यये सार्वधातुकसंज्ञायां शपं प्रबाध्य दिवादभ्य: श्यन्[5] इति श्यन् प्रत्ययेऽनुबन्धलोपे टित आत्मनेपदानां टेरे इति टेरेत्वे युज्यते इति रूपं निष्पद्यते।

**विचिन्तयन्ती यमनन्यमानसा**

**तपोधनं वेत्सि न मामुपस्थितम्।**

**स्मरिष्यति त्वां न स बोधितोऽपि सन्**

**कथां प्रमत्त: प्रथमं कृतामिव।।**[6]

उपर्युक्तश्लोके प्रथमं तिङन्तपदमस्ति–स्मरिष्यति। अत्र भ्वादिगणस्य स्मृ–चिन्तायाम् इत्यस्माद्धातो: लृट्लकारस्य प्रथमपुरुषैकवचनविवक्षां तिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञाया स्यतासी लृलुटो: इति स्य आगमे आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादे: इति इडागमेऽनुबन्धलोपे सार्वधातुकार्धधातुकयो: इति ऋकारस्य गुणे टपरत्वे सस्य मूर्धन्यादेशे च स्मरिष्यति इति रूपं निष्पद्यते

पनु: अन्यत् तिङन्तपदमस्ति वेत्सि। अत्र अदादिगणस्य विद्–ज्ञाने इत्यस्माद्धातो: लट्लकारस्य मध्यमपुरुषैकवचनविवक्षायां सिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां शपि अदिप्रभृतिभ्य: शप: इति शप्–प्रत्ययस्य लुकि– पुगन्तेति गुणे कृते खरि च इति दकारस्य चर्त्वे तकारे वेत्सि इति रूपं निष्पते।

“प्रियंवदा हा धिक्, हा धिक्। अप्रियमेव संवृतम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला। न खलु यस्मिन् कस्मिन्नपि। एष दुर्वासा: सुलभकोपो महर्षि। तथा शप्त्वा वेगवलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्त:।

अनसूया – कोऽन्यो हुतवहाद् दग्धुं प्रभवति। गच्छ पादयो: प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि।

प्रियंवदा– तथा

---

[3] पा.सू. 1/1/57

[4] पा.सू. 8/4/55

[5] पा.सू. 3/1/69

[6] अभि.शा. 4/1

अनसूया – अहो, आवेगस्खलितया गत्या प्रभृष्टं ममाग्रहस्तात् पुष्पभाजनम्।

प्रियंवदा – सखि! प्रकृतिवक्रः स कस्यानुनयं प्रतिगह्णाति। किमपि पुनः सानुक्रोशः कृतः

अनसूया – तस्मिन् वहेतदपि। कथय।

प्रियंवदा – यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन् प्रथम इति प्रेक्ष्याविज्ञाततपः प्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्पयितत्थ इति।

अनसूया – ततस्ततः।

प्रियंवदा – ततो न मे वचनमन्यथाभवितुमर्हति, किंत्वभिज्ञानाभरणदर्शनेन शापो निर्वतिष्यत इति मन्त्रयमाण एवान्तर्हितः।

अनसूया – शक्यमिदानीमाश्वसितुम्। अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं निपद्धम्। तस्मिन् स्वादीनोपाया शकुन्तला भविष्यति।

प्रियंवदा – सखि एहि देवकार्यं तावद् निर्वर्तयापः।

प्रियंवदा – अनसूये पश्य तावत्। वामहस्तोपहित-वदनाऽऽलिखितेव प्रियसखि। भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति, किं पुनरागन्तुकम्।[7]

उपर्युक्ते नाट्यांशे प्रथमं तिङन्तपदमस्ति उपकल्पयामि। अत्र उप उपसर्गपूर्वकात् भ्वादिगणस्य कृपू (कप्) सामर्थ्ये इत्यस्माद्धातोः हेतुमति च घति णिचि पुगन्तेति गुणे कृते टपरत्वे कर्पि इत्यस्य पुनः धातुसंज्ञज्ञयां लट्लकारस्य उत्तमपुरुषैकवचनाविवक्षायां मिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायाम् शपि सार्वधातुकेति गुणे अयादेशे दीर्घे कृपो रो लः[8] इति रेफस्य लत्वे कृते उपकल्पयामि इति रूपं निष्पद्यते।

उपर्युक्ते नाट्यभागे एव अपरं तिङन्तपदमस्ति – प्रतिगृह्णाति। अत्र प्रति उपसर्गपूर्वकात् क्रयादिगणस्य ग्रह् उपादाने इत्यस्माद्धातोः लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽनबन्धलोपे सार्वधातुकसंज्ञायां शपं प्रबाध्य 'यादिभ्य श्ना[9] इति श्ना प्रत्यये अनुबन्धलोपे सार्वधातुकमपित् इति ङिद्वद्भावे ग्रहिज्यावयित्यधि[10] इति रेफस्य सम्प्रसारणे ऋकारे सम्प्रसारणाच्च इति पूर्वरूपे अट्कुप्वाङ्नुम्[11] इति नस्य णत्वे कृते प्रतिग्रह्णाति इति रूपं निष्पद्यते।

पुनः अन्यत् तिङन्तपदमस्ति कथय। अत्र चुरादिगणस्य अदन्तात् कथ-वाक्यप्रबन्धे इत्यस्माद्धातोः सत्यापपाश. इति णिचि अतो लोपः इति अकारलोपे कथि इत्यस्यस्य पुनः धातुसंज्ञायां लोट्लकारस्य मध्यमपुरुषैकवचनविवक्षायां सिप् प्रत्यये सार्वधातुकसंज्ञायां शपि सार्वधातुकेति गुणे कृते अयादेश, सेह्र्यपिच्च इति सि स्थाने हि आदेशे अतो हे इति हि लोपे कथय इति रूपं निरुपद्यते।

---

[7] अभि.शा. अंक – 4, पृ. 201

[8] पा.सू. 8/2/18

[9] पा.सू. 3/1/81

[10] पा.सू. 6/1/16

[11] पा.सू. 8/4/2

अपरं तिङन्तपदमस्ति इच्छति। अत्र तुदादिगणस्य इष् इच्दायाम् इत्यस्माद्धातोः लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां शपं प्रबाध्य तुदादिभ्यः शः इति शप्रत्ययेऽनुबन्धलोपे इषुगमियमां हः[12] इति षस्य छत्वे हे च[13] इति तुगागमेऽनुबन्धलोपे स्तोः श्चुना श्चुः[14] इति श्चुत्वेन तकारस्य चकारे कृते इच्छति इति रूपं निष्पद्यते।

पुनः अन्यत् तिङन्तपदमस्ति निर्वर्तिष्यते। अत्र निट् उपसर्गपूर्वकात् दिवादिगणस्य वृतु वृत् वर्तने इत्यस्माद्धातोः लृट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां त प्रत्यये सार्वधातुकसंज्ञायां स्यतासी लृलुटोः इति स्य-आगमे आर्धधातुकसंज्ञायाम् पूंगन्तलधूपधस्य च इति लघूपधगुणे कृते उरण् रपरः इति रपरत्वे आर्धधातुकस्येड्वलादेः इति इडागमेऽनुबन्धलोपे सस्य मूर्धन्यादेशे टित आत्मनोपदानां टेरे इति टेरेत्वे निर्वतिष्यते इति रूपं निष्पद्यते।

उपर्युक्ते नाट्यभागे अपरं तिङन्तपदमस्ति - निर्वर्तयावः। अत्र निर् उपसर्गपूर्वकात् चुरादिगणवस्य वृतु भाषायाम् इत्यस्माद्धातोः सत्यापपाशरूप इति णिचि पुगन्तेति गुणे रपरत्वे च वर्ति इत्यस्य पुनः धातुसंज्ञायां लट्लकारस्य उत्तमपुरुषद्विवचनविवक्षायां वस् प्रत्यये सार्वधातुकसंज्ञायां शपि सार्वधातुकेति गुणे अयादेशे अतो दीर्घो यञि इति अकारस्य दीर्घे सस्य रुत्वविसर्गे च निर्वर्तयावः इति रूपं निष्पद्यते।

पुनः अन्यत् तिङन्तपदमस्ति पश्य। अत्र भ्ववादिगणस्य दृशिर् (दृश) प्रेक्षणे इत्यस्माद्धातोः लोट्लकारस्य मध्यमपुरुषैकवचन विवक्षायां सिप् प्रत्यये सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे पाघ्रस्थाम्ना[15] इति दृश् - स्थाने पश्य-आदेशे अतो गुणे इति पररूपे सेह्र्यपिच्च इति सिस्थाने हि आदेशे अतो हेः इति हि लुकि पश्य इति रूपं निष्पद्यते।

उपर्युक्ते नाट्यांशे अन्तिमं तिङन्तपदमस्ति विभावयति। अत्र वि उपसर्गपूर्वकात् भ्वादिगणस्य भू सत्तायाम् इत्यस्माद्धातोः हितुमति च[16] इति णिच्, सार्वधातुकेति गुणे आवादेशे च भावि इत्यस्य पुनः धातुसंज्ञायां लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽबन्धलोपे सार्वधातुकसंज्ञायां शपि सार्वधातुकेति गुणे अथादेशे च विभावयति इति रूपं निष्पद्यते।

अनसूया - प्रियंवदे, द्वयोरेव नौ मुख एष वृतान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी।
प्रियंवदा - को नामोष्णोदकेन नवमालिका सिञ्चति।
शिष्यः - वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृतेन काश्यपेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। इन्त, प्रभातम्।
तथाहि -

**यात्येकतोऽस्तशिखरं पतिरोषधीना-**

---

[12] पा.सू. 7/3/77
[13] पा.सू. 6/1/73
[14] पा.सू. 8/4/40
[15] पा.सू. 7/3/78
[16] पा.सू. 3/1/26

**माविष्कृतोऽरुणपुरः सर एकतोऽर्कः।**

**तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां**

**लोको नियम्यत इवात्मदशान्तरेषु।।**[17]

उपर्युक्त नाट्यांशे प्रथमं तिङन्तपदमस्ति-तिष्ठतु। अत्र भ्वादिगणवस्य ष्ठा स्था गतिनिवृत्तौ इत्यस्माद्धातोः लोट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां शपि पाघ्राध्मास्थाम्ना. इति स्था-स्थाने तिष्ठ् आदेशे एरुः इति इकारस्य उकारे कृते तिष्ठतु इति रूपं निष्पद्यते।

पुनः द्वितीयं तिङन्तपदमस्ति सिञ्चति। अत्र तुदादिगणस्य षिच् क्षरणे इत्यस्माद्धातोः धात्वादे षः सः[18] इति षस्य सत्वे सिच् इत्यस्माद् लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽनुबंधलोपे सर्वधातुकसंज्ञायां शपं प्रबाध्य तुदादिभ्य शः इति शप्रत्यये अनुबन्धलोपे शे मुचादीनाम्[19] इति नुमागमेऽनुबन्धलोपे नश्चाऽपदान्तस्य झलि[20] इति नस्य अनुस्वादे अनुस्वारस्य यञि परसवर्णः[21] इति परसवर्णे च कृते सिञ्चति। इति रूपं निष्पद्यते

उपर्युक्ते अपरं तिङन्तपदमस्ति याति। अत्र अदादिगणस्य या -प्रापणे इत्यस्माद्धातोः लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप्-प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां कर्तरि शप् इति शपि अदिप्रभृतिभ्यः शपः[22] इति शब्लुकि याति इति रूपं निष्पद्यते।

पुनः उपर्युक्ते नाट्यभागे अन्तिमं तिङन्तपदमस्ति नियम्यते अत्र नि-उपसर्गपूर्वकात् यम्-उपरमे इत्यस्माद्धातोः कर्मणिः विवक्षायां लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां त प्रत्यये सार्वधातुकसंज्ञायां सार्वधातुके यक् इति यकि अनुबन्धलोपे नियम्यते इति रूपं निष्पद्यते।

**अन्तर्हिते शशिनि सैव कुमुद्वती मे,**

**दृष्टिं न नन्दयति संस्मरणीयशोभा।**

**इष्टप्रवासजनितान्यबलाजनस्य**

**दुःखानि नूनमतिमात्रसुदुःसहानि।।**[23]

उपर्युक्ते श्लोके तिङन्तपदमस्ति नन्दयति। अत्र भ्वादिगणस्य टुनादि नद् समृद्धौ इत्यस्माद्धातोः इदितो नुम् धातोः इति नुमि

[17] अभि.शा. 4/2

[18] पा.सू. 6/1/64

[19] पा.सू. 7/1/59

[20] पा.सू. 8/3/24

[21] पा.सू. 8/4/58

[22] पा.सू. 2/4/72

[23] अभि. शा. 4/3

अनुबन्धलोपे हेतुमति च इति णिचि अनुबन्धलोपे नन्दि इत्यस्य पुनः धातुसंज्ञायां लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्ययेऽनुबन्धलोपे सार्धातुकसंज्ञायां शपि सार्वधातुकेति गुणे कृते अयादेशे च कृते नन्दयति इति रूपं निष्पद्यते।

अनसूया – यद्यनि नाम विषयपराङ्मुखस्य जनस्यैतत्र विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्।

शिष्यः – यावदुपस्थितां होमवेला गुरवे निवेदयामि।

अनसूया – प्रतिबुद्धाऽपि किं करिष्ये। न म उचितेष्वपि निजाकर्येषु हस्तपादं प्रसरति। काम इदानीं सकामो भवतु। येनासत्यसन्धे जने शून्य हदया सखीपदं कारिता। अथवा दुर्वाससः शाप एव विकारयति। अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावतः कालस्य लेखमात्तमपि न विसृजति। तदितोऽभिज्ञानमऽगुलीयक तस्य विसृजपः। दुःख शीले तपस्विजने कोऽभ्यर्त्यताम्। ननु सखीगामी दोष इति व्यवसिताऽपि न पारयामि प्रवास। प्रतिनिवृत्तस्य तातकाश्यपरस्य दुष्यन्त- परिणीतामापन्नसत्वां शकुन्तलां निवेदयितुम्। इत्थंगतेऽस्माभिः किं करणीयम्।

प्रियंवदा- सखि, त्वस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम्।

अनसूया – सखि कथमेतत्।

प्रियंवदा – शृणु। इदानीं सुखशयितप्रच्छिका शकुन्तलासकाशं गातस्मि।

अनसूया – ततस्ततः।

प्रियंवदा- तावदेनां लज्जावनतमुखी परिष्वज्य तातकाश्यपैनेवमयि नन्दितम्। दिष्टज धूमाकुलितदृष्टेरपि। यजमानस्य पावक एवाहुतिः पतिता। वत्से, सुशिष्यपरिदता विद्येवाशोचनीयासि संवृता। अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामीति।[24]

उपर्युक्तनाट्यांशे प्रथमं तिङन्तपदमस्ति – निवेदामि। अत्र नि-उपसर्गपूर्वकात् अदादिगणस्य विद् ज्ञाने इत्यस्माद्धातोः हेतुमति च इति णिचि पुगन्तेति गुणे कृते वेदि इत्यस्य पुनः धातुसंज्ञायां लट्लकारस्य उत्तमपुरुषैकवचनविवक्षायां मिप्- प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां शपि, सार्वधातुकेति गुणे कृते एचोऽयवायावः इति अयादेशे कृते अतो दीर्घो यञि इति अकारस्य दीर्घे कृते निवेदयामि इति रूपं निष्पद्यते।

पुनः अन्यत् तिङन्तपदमस्ति करिष्ये। अत्र तनादिगणस्य डुकृञ् कृ करणे इत्यस्माद्धातोः लृट्लकारस्य उत्तमपुरुषैकवचनविवक्षायाम् इत् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां स्यतासी लृलुटो इति स्य आगमे आर्धधातुकसंज्ञायां **आर्धधातुकस्येडवलादेः** इति इडागमेऽनुबन्धलोपे सार्वधातुकेति ऋकारस्य गुणे, रपरत्वे, यस्य मूर्धन्यादेशे टेरेत्वे अतो गुणे इति पररूपे च कृते करिष्ये इति रूपं निष्पद्यते।

अपरं तिङन्तपदमस्ति विकारयति। अत्र वि-उपसर्गपूर्वकात् तनादिगणस्य डु कृञ् कृ करणे इत्यस्माद्धातोः हेतुमति च इति णिचि अचोञ्णिति इति वृद्धौ रपरत्वे च कारि इत्यस्य पुनः धातुसंज्ञायां लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिप् प्रत्यये अनुबन्धलोपे, सार्वधातुकसंज्ञायां शपि सार्वधातुकेति गुणे अयादेशे च विकारयति इति रूपं निष्पद्यते।

---

[24] अभि.शा. अंक ' 4, पृ. 208

पुनः अग्रिमं तिङन्तपदमस्ति पारयामि। अत्र जुहोत्यादिगणस्य पृ पालनपूरणयोः इत्यस्माद्धातोः णिचि वृद्धौ रपरत्वे पारि इत्यस्य पुनः धातुसंज्ञायां लट्लकारस्य उत्तमपुरुषैकवचनविवक्षायां मिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां सार्वधातुकेति गुणे अयादेशे अतो दीर्घो यञि इति दीर्घे कृते पारयामि इति रूपं निष्पद्यते।

उपर्युक्त नाट्यभागे अपरं तिङन्तपदमस्ति – त्वरस्व। अत्र भ्वादिगणस्य ञि त्वय त्वर सम्भ्रमे इत्यस्माद्धातोः लोट्लकारस्य मध्यमपुरुषैकवचनविवक्षायां थास्–प्रत्यये सार्वधातुकसंज्ञायां शपि थासः से[25] इति थास् स्थाने से **आदौ सर्वाभ्यां वामौ**[26] इति एकारस्य स्थाने वकारे कृते त्वरस्व इति रूपं निष्पद्यते।

पुनः अन्यत् तिङन्तपदमस्ति शृणु। अत्र भ्वादिगणस्य श्रु श्रवणे इत्यस्माद्धातोः लोट्लकारस्य मध्यमपुरुषैकवचनविवक्षायां सिप् प्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां शपं प्रबाध्य श्रुवः शृ च[27] इति श्रु स्थाने शृ आदेशे श्नु प्रत्ययेऽनुबन्धलोपे च शृ नु सि इति।

**सन्दर्भग्रन्थाः** :-


1. अभिज्ञानशाकुन्तलम् , डॉ. राजदेव मिश्र, घनश्याम एण्ड संस फेजाबाद (उ.प्र)
2. सिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा एवं रघुनाथ शास्त्री, चोखम्बा प्रकाशन वारणसी।
3. व्याकरणमहाभाष्यम्, चारुदेव शास्त्री, मोतीलाल बनारसीदास प्रकाशन दिल्ली।
4. लघुसिद्धान्तकौमुदी, (भैमी व्याख्या) पं. भीमसेन शास्त्री, भीमसेन शास्त्री प्रभाकर, गाँधीनगर, दिल्ली।
5. मध्यसिद्धान्तकौमुदी, प्रो. अर्कनाथ चौधरी, हंसा प्रकाशन, जयपुर।
6. वैयाकरणभूषणसारः, कौन्डभट्टः, मोतीलाल बनारसीदास प्रकाशन दिल्ली।


[25] पा.सू. 3/4/80

[26] पा.सू. 3/4/91

[27] पा.सू. 3/1/74